## कर्मणो रोमन्थतपोभ्यां वर्तिचरोः । (१५/२६७१)

रोमन्थशब्दात् तपःशब्दाच् च कर्मणो यथाक्रमं वर्तिचरोरर्थयोः क्यङ प्रत्ययो भवति । रोमन्थं [1]वर्तयति रोमन्थायते [2]गौः ।

[१९०] हनुचलने इति वक्तव्यम् । (म. भा. २. २५)

इह [3]मा भूत्, कीटो रोमन्थं वर्तयति (म. भा. २. २५) ।

[१९१] तपसः परस्मैपदं च (म. भा. २. २५) ।

तपश्चरति तपस्यति ॥

## बाष्पोष्मभ्यामुद्वमने । (१६/२६७२)

[4]कर्मणः इति वर्तते । बाष्पशब्दाद् [5]ऊष्मशब्दाच् च कर्मण उद्वमनेऽर्थे क्यङ प्रत्ययो भवति । बाष्पमुद्वमति बाष्पायते । [6]ऊष्मायते ।

[१९२] फेनाच्चेति वक्तव्यम् । (मा. भा. २. २५)

[7]फेनमुद्वमति फेनायते ॥

## शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे । (१७/२६७३)

[8]शब्द वैर कलह अभ्र कण्व मेघ इत्येतेभ्यः करणे करोत्यर्थे क्यङ प्रत्ययो भवति । शब्दं करोति शब्दायते । [9]वैरायते । कलहायते । अभ्रायते । कण्वायते । मेघायते ।

[१९३] सुदिनदुर्दिननीहारेभ्यश्चेति वक्तव्यम् । (म. भा. २. २६)

[10]सुदिनायते । दुर्दिनायते । नीहारायते ।

[१९४] [11]अटाट्टाशीकाकोटापोटासोटाप्रुष्टाप्लुष्टाग्रहणं कर्तव्यम् । (म. भा. २.२६)

[12]अटायते । अट्टायते । शीकायते । [13]कोटायते । पोटायते । सोटायते[14] । प्रुष्टायते । प्लुष्टायते[15] ॥

---

1. वर्तयते ड. 2. गौः नास्ति क.फ.ह. 3. न भवति क. 4. वाक्यमिदं नास्ति फ. 5. ऊष्मन्शब्दात् क. फ. 6. ऊष्माणं उद्वमते इत्यधिकम् क, ऊष्माणं उद्भवति इत्यधिकम् अ. ड. ह. 7. फेनमुद्वमति नास्ति अ. क. फ. 8. शब्दादिभ्यः फ. 9. वैरं करोति इत्यधिकम् ह. 10. सुदिनं करोति इत्यधिकम् ग. 11. अटाट्टाशीकाकोटापोटासोटासृष्टाप्लुष्टाधृष्टापृष्टा ह्यं° क, °क्रष्टाग्रहणं° अ. 12. नास्ति ब. 13. अपकोटायति ब. 14. सृष्टा सृष्टायते इत्यधिकम् क. 15. धृष्टा–धृष्टायते इत्यधिकम् क, पुष्टायते इत्यधिकम् अ. क, वृष्टायते इत्यधिकम् फ.